# 'वृद्धिरादैच्' इति सूत्रार्थविमर्शः
# 'Vṛddhirādaic' iti sūtrārthavimarśaḥ

**Dr. Joydeb Dinda**
Assistant Professor, Dept. of Vyakarana
Laxmi Devi Shroff Adarsh Sanskrit Mahavidyalaya
B. Deoghar, Jharkhand, India.
Email: debjoydinda@gmail.com

**Abstract:** Pāṇini's grammar determines the authenticity of words. Among all the grammars seen, inferred, complete or incomplete, the grammar of Pāṇini reigns supreme. That's why the usefulness of the entire Pāṇini's grammar is openly described in the purāṇa and upapurāṇas. Even the grammar of Śākaṭāyana, Āpiśali etc., the grammar of Pāṇini surpasses all other grammars for considering the correctness and incorrectness of popular (laukika) and Vedic words. The primacy of Pāṇini in this grammar is accomplished by hearing the name Pāṇiniya Vyākaraṇa. Pāṇini, by severe austerities, worshiped Maheśvara and by His grace obtained fourteen sūtras such as 'aiuṇ' and by them he first composed the Aṣṭādhyāyī to demonstrate the correctness of the word. 'Vṛddhirādaic' is the first sūtra of Aṣṭādhyāyī. Among the six kinds of sūtras this is saṃjñāsūtra. Ād and aic are called vṛddhi. According to Bhaṭṭojidīkṣita, the sūtra is composed of two padas, 'vṛddhi' and 'adaich'. There is a 'dvandva' compound in 'adaich' pada. But, Nāgeśa is of deferent opinion. According to him, this sūtras is composed of three padas, vṛddhi, ād and aic. Thus, the word vṛddhi has many meanings but in the context of the grammatical sūtra of pāṇini the word vṛddhi has specific meaning as denoting ād and aic. Also, in the sūtra the word vṛddhi denotes auspiciousness. In this research article entitled 'vṛddhirādaic iti sūtrārthavimarśaḥ', we have discussed the sūtra in detail.

**Keywords:** Pāṇiniḥ, Patañjaliḥ, Aṣṭādhyāyī, Mahābhāṣyam, Vṛddhiḥ, Bhaṭṭojidīkṣitaḥ, Nāgeśaḥ, Siddhāntakaumudī, Laghuśabdenduśekharaḥ.

**उपोद्घातः—**

प्रकृतिप्रत्ययविवेचनपुरस्सरं भाषायाः स्वरूपमुपवर्णयत् साध्वसाधुशब्दनिरूपणं च कुर्वत् व्याकरणशास्त्रम् इतरशास्त्रापेक्षया विदुषामत्यन्तोपरकारकं यतश्च तद्विना शब्दस्य सम्यग्ज्ञानाय सुष्ठु प्रयोगाय च नास्त्यन्यः लघूपायः। अत एवोक्तं भाष्ये" –न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः ज्ञातुम्"[1] इति। व्याकरणं न केवलमत्यन्तोपकारकत्वेन अपि तु परमपरित्रत्वेन च सम्भावितं प्राचीनैः। अनेन सिद्धानां शब्दानामन्वाख्यानं क्रियते। तेन व्याकरणं नाम प्रकृतिप्रत्ययविभागेन शब्दसाधुत्वविवेचकं शास्त्रम्। पाणिनीयव्याकरणस्य पाणिनिः कात्यायनः पतञ्जलिश्चेति त्रयो महर्षयः प्रवक्तारः। एतच्च मुनित्रयाधारत्वात् सूत्रवार्तिकभाष्यसमुदितं व्याकरणं पूर्णाङ्गतां भजमानं 'त्रिमुनि व्याकरणम्' इति प्रसिद्धम्। शब्दानुशासनापरपर्यायभूते शास्त्रेऽस्मिन् मुनित्रयोक्तानामेव प्रामाण्यं नेतरेषाम्।

**सूत्रार्थः—**

पाणिनिना पारिभाषिकशब्दानामर्थावबोधाय संज्ञासूत्राणि प्रणितानि। कृत्रिमा अकृत्रिमा चेति पारिभाषिकसंज्ञा द्विविधा भवति। 'वृद्धिरादैच्' इत्यनेन कृत्रिमा वृद्धिसंज्ञा व्यधायि। आचार्यपारम्पर्योपदेशसिद्धसंज्ञाधिकारात् संज्ञेति लभ्यते। सूत्रेऽस्मिन् पदद्वयं विद्यते। वृद्धिः आदैच् इति सूत्रगतपदच्छेदः। 'वृद्धिः' इति प्रथमैकवचनान्तं पदम्। 'वृधु वर्धने' इति धातोः 'स्त्रियां क्तिन्' (अष्टा.– ३.३.९४) इत्यनेन क्तिन्प्रत्यये वृद्धिशब्दो निष्पद्यते। 'आदैच्' इति प्रथमैकवचनान्तं पदम्। वृद्धिशब्दस्य आदैच्शब्दस्य च प्रथमनान्तत्वात् सामानाधिकरण्यमाश्रित्य आदैचः वृद्धिपदाभिन्ना इति सूत्रबोधो जायते। आदैच् वृद्धिसंज्ञः स्यादिति सूत्रार्थः। एतदेवोक्तं भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याः वृत्तौ– "आदैच्च वृद्धिसंज्ञः स्यात्" इति। आदैचमुद्दिस्य वृद्धिसंज्ञा विधीयतेऽनेन। आत्पदबोध्याः षडाकाराः, ऐच्पदबोध्यौ ऐकारौकारौ च द्विमात्रकाः संज्ञिनो बोध्याः।

**'आदैच्' इति समस्तपदम्—**

दीक्षितमते सूत्रेऽस्मिन् 'आदैच्' इति समस्तं पदम्। आच्च ऐच्चेति आदैच् इति समाहारद्वन्द्वसमासः। 'आदैच्' इत्यत्र समाहारद्वन्द्वे 'द्वन्द्वाच्चुदषहान्तात्समाहारे' (अष्टा.– ५.४.१०६) इन्यनेन समासान्तः टच्प्रत्ययः कुतो न इति चेदुच्यते समासान्तविधेरनित्यत्वात्[2] समाहारद्वन्द्वेऽपि न समासान्तः टच्। समासान्तविधेरनित्यत्वे ज्ञापकं तु 'द्वित्रिभ्यां पाद्दन्मूर्धसू बहुव्रीहौ' (अष्टा.– ६.२.१९७) इत्यत्र 'द्वित्रिभ्यां ष मूर्ध्नः' (अष्टा.– ५.४.११५) इत्यनेन समासान्तषप्रत्यये सप्तमीबहुवचने अदन्तत्वात् 'मूर्द्धेषु' इति वक्तव्ये 'मूर्द्धसु' इति वचनम्।

परिभाषेन्दुशेखरे समासान्तविधेरनित्यत्वे[3] अन्तोदात्तत्वाय अंश्वादिषु राजञ्शब्दस्य पाठः ज्ञापकत्वेन व्याख्यातः। समासान्तविधेरनित्यत्वाभावात्तु प्रतिकूलो राजा प्रतिराजा इत्यत्र 'राजाहस्सखिभ्यष्टच्' (अष्टा.– ५.४.९१) इत्यनेन समासान्ते टचि तस्य चित्त्वात् 'चितः' (अष्टा.– ६.१.१६३) इत्यनेन सप्रकृतेः अन्तोदात्तत्वे सिद्धे पुनः अंश्वादिषु राजञ्शब्दस्य पाठो व्यर्थः। स व्यर्थीभूय इमां परिभाषां ज्ञापयति। ज्ञापितायां तु समासान्तविधेरनित्यत्वात् टच् न भवति। तस्मात् चित्त्वाभावात् अन्तोदात्तोऽपि न। 'प्रतेरंश्वादयस्तत्पुरुषे' (अष्टा.– ६.२.१९३) इत्यनेन अन्तोदात्तत्वायैव अंश्वादिगणे राजञ्शब्दस्य पाठः कृतः।

कैय्यटमते[4]ऽपि 'आदैच्' इति समस्तं पदम्। भिन्नपदत्वे सूत्रेण आदैचमुद्दिश्य वृद्धिसंज्ञाविधानात्, उद्देश्यस्यानेकत्वात् वृद्धिशब्दस्य आवृत्तिर्वाक्यार्थबोधाय कर्तव्या स्यात्। परन्तु द्वन्द्वे समाहारस्यैकस्योद्देश्यस्य शब्दतः सम्भवात् आवृत्तिं विनापि संज्ञा सिद्ध्यति। अथवा 'आदैच्' इत्यत्र अस्तु आच्च ऐच्चेति इतरेतरद्वन्द्वः। ननु इतरेतरद्वन्द्वे द्विवचनं कथं न चेदुच्यते 'आदैच्'[5] इत्यत्र सौत्रमेकवचनम्। अथवा 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' (अष्टा.– ७.१.३९) इत्यनेन इतरेतरद्वन्द्वे द्विवचने औविभक्तेः[6] लुक्।

**'आदैच्' इत्यसमस्तपदम्—**

नागेशमते[7] "न केवलं चर्चापदानि व्याख्यानम्– वृद्धिः आत् ऐच्"[8] इति पस्पाशाह्निके साक्षादुक्तत्वेन 'वृद्धिरादैच्' इत्यत्र पदत्रयमेव। पदमञ्जरीकारो हरदत्तोऽपि[9] तथैव। 'आत्', 'ऐच्' इति भिन्नं पदम्। 'आदैच्' इत्यस्य समासत्वे तु समासान्तप्रत्ययः[10] स्यात्। ननु समासान्तप्रत्ययस्य अनित्यत्वादेव 'आदैच्' इत्यत्र समासान्तप्रत्ययो न चेदुच्यते अनित्यत्वस्य अगतिकगतित्वादत्र[11] समासान्तविधेरनित्यत्वात् समासान्तप्रत्ययो न इति न संगतम्। तदपेक्षया 'आत्', 'ऐच्' इति भिन्नं पदम् इति मतमेव समीचीनम्। सूत्रस्यास्य पदत्रयत्वे अत्रैव सूत्रभाष्ये 'कृतमनयो साधुत्वम्'[12] इति द्विवचनासङ्गतिः स्याच्चेदुच्यते 'अनयो:' इति द्विवचनेन 'उद्देश्यविधेयदलयोः'[13] इत्यर्थस्वीकारे न अनिष्टापत्तिः। तस्मादत्र पदत्रयमेव। किञ्च शङ्कासमाधानयोः करणस्य भाष्यकारशैलीसिद्धतया प्रकृते तदकरणात् पदत्रये एव भाष्यतात्पर्यमिति सम्भाव्यते। अन्यथा कुत्वं कस्मान्न भवतीति कुत्वादिशङ्कापरिहाराविव समासान्तादिशङ्कापरिहारौ कर्तव्यौ स्याताम्।

**सूत्रेषु उभयसंज्ञाप्रवृत्तिः—**

'वृद्धिरादैच्' इत्यत्र 'चोः कुः' (अष्टा.– ८.२.३०) इत्यनेन पदान्ते विहितं कुत्वं कथं न? 'अयस्मादीनि च्छन्दसि' (अष्टा.– १.४.२०) इत्यनेन भत्वात् न कुत्वम्। एकसंज्ञाधिकारे पाठात् भसंज्ञा हि परत्वादनवकाशत्वाच्च पदसंज्ञायाः बाधिका। ननु छन्दस्येव ह्यनेन भसंज्ञा, सूत्राणां छन्दस्त्वाभावाद् भत्वं न इति चेन्न पदपदार्थबोधनद्वारा वेदोपकरणत्वात्, "मुखं व्याकरणं स्मृतम्"[14] इत्यादिनाङ्गत्वनिरूपणात्, "प्रधानं च षड्स्वङ्गेषु व्याकरणम्"[15] इति भाष्योक्तेश्च 'छन्दोवत्सूत्राणि भवन्ति' इत्यादिनिर्देशात् छान्दसविधीनां सूत्रेष्वपि प्रवृत्तिर्भवत्येव।

'वृद्धिरादैजदेङ्गुणः' इति संहितापक्षे चकारस्य 'झलां जशोऽन्ते' (अष्टा.– ८.२.३९) इति पदान्ते विहितं जश्त्वं तु पदत्वात् भवत्येव। 'आकरादेका संज्ञा' (अष्टा.– १.४.१) इति एकसंज्ञाधिकारे पठितेऽपि 'उभयसंज्ञान्यपि च्छन्दसि दृश्यन्ते' इति नियमात् सूत्रेष्वपि छन्दस्त्वारोपात् संज्ञयोः समावेशो भवत्येव। संज्ञयो: समावेशे पदन्वात् कुत्वं, भत्वात् जश्त्वाभावः कथं न इति चेदुच्यते 'छन्दसि दृष्टानुविधिः' इति वचनाद् यथास्ति तथा विचारः कर्तव्यः इति।

वस्तुतः सुप्सकारपरत्वाभावे प्रत्याहारघटकस्य चस्य 'चोः कुः' (अष्टा.– ८.२.३०) इत्यनेन कुत्वं न इत्यस्य 'वृद्धिरादैच्' इत्यत्र कुत्वाभाव एव ज्ञापकः। तेन 'उपदेशेऽजनुनासिक इत्' (अष्टा. – १.३.२), 'अजादेर्द्वितीयस्य' (अष्टा.– ६.१.२), 'इजादेः सनुमः' (अष्टा.– ८.४.३२) इत्यादिसौत्रनिर्देशाः, 'अज्भिरव्यवहिताः', 'अनुनासिकोऽजित्संज्ञः', 'अजादीनाम्' इत्यादयो दीक्षितोक्ताः संगच्छन्ते। कारणं हि अत्र सुप्सकारपरत्वाभावात् 'चोः कुः' (अष्टा.– ८.२.३०) इत्यनेन कुत्वं न, तथैव ऐच्पदेऽपि। सुप्सकारपरत्वाभावे इत्युक्त्या तु 'अचोऽक्षु'[16] इति भाष्यवचने नासङ्गतिः। 'अक्षु' इत्यत्र सुप्सकारपरत्वात् कुत्वं भवत्येव। सुप्सकारेत्युक्त्या 'अच्सन्धिः' इत्यत्रापि कुत्वं न।

**तपरकरणप्रयोजनम्—**

पाणिनिना सूत्रेऽस्मिन् तपरकरणं विहितम्। चास्ति तपरपदे द्विविधः समासः तात्परः तपरः, तः परो यस्मात् स तपरश्चेति। अतोऽस्मिन् आत् इति तपरः ऐच् इति तपरश्च। अत्र शङ्कोदेति यदाकारस्य वर्णसमाम्नाये पाठाभावात् अण्प्रत्याहारे अनन्तर्गतत्वात् 'अणुदित्सवर्णस्य चाप्रत्ययः' (अष्टा.– १.१.६९) इत्यनेन आकारस्य सवर्णग्राहकत्वाभावात् 'आत्' इत्यत्र तपरकरणं किमर्थम्? किञ्च गुणानामभेदकत्वात् आकारेण अनुनासिकादीनां षड्विधानामपि बोधकत्वाद् विनापि तपरकरणेन लक्ष्यसिद्धिः चेदुच्यते आदित्यत्र तपरकरणन्तु सन्देहनिवृत्त्यर्थं किञ्च ऐच्पदार्थम्। तः परो यस्मात् सः तपरः इति बहुव्रीहौ तपरकरणं पूर्वार्थम्। अत्र तपरत्वाभावे वृद्धौ सन्देहः स्यात् अकारोऽस्ति आकारो वा। किञ्च तात्परः तपरः इति तत्पुरुषे उत्तरार्थम्। तेन ऐचः तात्परत्वात् द्विमात्रका एव संज्ञिनो बोध्याः। तस्मादेव 'कृष्णैकत्वम्' इत्यत्र स्थानिनः त्रिमात्रकत्वेऽपि द्विमात्रिका एवं वृद्धिः, त्रिमात्रकचतुर्मात्रकाणां वृद्धिसंज्ञकत्वाभावात्। अतः असन्देहार्थतया पूर्वार्थं, प्लुतवारणाय च परार्थं तपरोच्चारणमिति बोध्यम्। गुणानां भेदकत्वपक्षे 'आ' इत्यनेन अनुनासिकत्वादीनां ग्रहणाभावात् 'आत्' इत्यत्र तपरकरणमसन्देहार्थतया पूर्वार्थमिति यदुक्तं तन्न समीचीनमिति चेदुच्यते 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' (अष्टा.– ७.१.७५) इत्यत्र उदात्तग्रहणसामर्थ्यात् गुणानामभेदकत्वपक्षः स्वीकृतो भाष्ये। अत्रापि सूत्रे यत्नविशेषाभावात् गुणानामभेदकत्वं स्वीकृतम्। तथा च अभेदकत्वात् षण्णामपि ग्रहणसम्भवात् तपरकरणमसन्देहार्थतया पूर्वार्थमेवेति नागेशेन[17] समाहितम्।

ननु कार्यकालपक्षे आदैच्पदाभिन्ना वृद्धिर्भवति इति पदैकवाक्यतया ऐचः विधीयमानत्वेन अणुदित्सूत्रस्य अप्रवृत्त्या सवर्णग्रहणं न भवति। तथा च त्रिमात्रस्य प्लुतस्य ऐकारस्य औकारस्य

ऐच्पदेन ग्रहणाभावात् तद्वारणाय तपरकरणमनावश्यकम्। एवञ्च परार्थतया तपरकरणं स्पष्टार्थमेव इति चेन्न कार्यकालपक्षे 'मृजेर्वृद्धिः' (अष्टा.– ७.२.११४) इत्यादिविधिसूत्रप्रदेशे वाक्यैवाक्यतया 'वृद्धिरादैच्' इति सूत्रस्यान्वयो भवति न तु पदैकवाक्यतया। किञ्च कार्यकालपक्षेऽपि 'ऐच्' इति अविधीयमानः। अतः सवर्णग्रहणेन भिन्नकालस्य प्लुतस्यापि ग्रहणं भवति तद्वारणाय ऐच्पदं परार्थं न तु सन्देहनिवृत्त्यर्थम्।

'आत्' इत्यनेन षण्णामाकाराणाम् 'ऐच्' इत्यनेन वर्णद्वयस्य बोधकत्वाद् सूत्रेऽस्मिन् एकवचनमयुक्तमिति चेन्न, 'आत्' इत्यत्र जात्यभिप्रायेण 'ऐच्' इत्यत्र तिरोहितावयवाभिप्रायेण एकवचनम्। सर्वत्र प्रत्याहारस्थले एवमेकवचनं बोध्यम्। यत्र तु उद्भूतावयवविवक्षा तत्र 'झलां जशोऽन्ते' (अष्टा.– ८.२.३९) इतिवद् बहुवचनं ज्ञेयम्।

**संज्ञासंज्ञिविचारः—**

सूत्रे 'वृद्धिः' इति संज्ञादलम्, 'आदैच्' इति संज्ञिदलम्। अत्र प्रश्नो भवति सूत्रेणानेन आदैच्पदबोध्यसमुदायस्य वृद्धिसंज्ञा उत प्रत्येकं वर्णस्य इति। समाधानन्तु आदैच्पदबोध्यसमुदायस्य न संज्ञा, तादृशलक्ष्याभावात् संज्ञावैयर्थ्यापत्तेः किन्तु आदैच्पदबोध्यप्रत्येकं वर्णस्यैव वृद्धिसंज्ञा।

ननु सूत्रे किं संज्ञावाचकपदं किञ्च संज्ञिवाचकम्? "अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः"[18] इति भाष्ये आनाकृतिरित्यस्य भेदरहिता इत्यर्थः। एका इति यावत्। आकृतिमन्तः इत्यस्य भेदवन्त इत्यर्थः। अनेके इति यावत्। तथा चैकशब्दत्वात् वृद्धिः संज्ञा। बहुत्वादैचः संज्ञिनः। लघ्वर्थं हि संज्ञाकरणम् इत्यादिना वृद्धेः संज्ञात्वम् आदैचः संज्ञीत्वम्। एकस्य वृद्धिपदस्य आ ऐ औ इति संज्ञात्रयकरणेन प्रयोजनाभावात् गौरवाच्च वृद्धिपदमेव संज्ञापरम् आदैच् इति संज्ञिपरम्।

ननु पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा। कारणं ह्यादौ उद्देश्यं वक्तव्यं ततो विधेयम्। संज्ञा भवति विधेया, संज्ञी च उद्देश्यः। सतो हि कार्यिणः कार्येण भवितव्यम्। इतरत्रापि सतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते। कथं 'वृद्धिरादैच्' इत्यत्रादौ संज्ञावाचकपदं पश्चाच्च संज्ञिवाचकम्। भाष्यकृतात्र निगद्यते– "एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति। सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा। अदेङ्गुणः इति यथा"[19] इति। एतेन 'आदैज्वृद्धिः' इत्येव सूत्रयितुमुचितम् इति शङ्का अपास्ता।

ननु 'अपृक्त एकाल्प्रत्ययः', (अष्टा.– १.२.४१) 'तपरस्तत्कालस्य', (अष्टा.– १.१.७०) 'येन विधिस्तदन्तस्य' (अष्टा.– १.१.७२) इत्यादिसूत्रेषु मङ्गलवाचकत्वाभावादपि विधेयवाचकस्य संज्ञापदस्यादौ प्रयोगः कथं चेदुच्यते विधेयस्य पूर्वं प्रयोगे असाधुत्वं भवतीति एतादृशभ्रमवारणाय[20] नियमवैपरित्येन सूत्रकृता एतादृशः प्रयोगो विहितः। तथा च विधेयस्य प्रथमप्रयोगे औचित्यमात्रमेव बोधितं न तु असाधुत्वम्।

**वृद्धिशब्दस्य स्वरूपपरकत्वम्—**

अस्मिन् 'वृद्धिरादैच्' इति सूत्रे वृद्धिशब्दः स्वरूपपरः न तु अर्थपरः। अन्येन केनापि सूत्रेण वृद्धिसंज्ञाविधानाभावात् वृद्धिशब्दोऽत्र स्वरूपपरः। अनेन सूत्रेण हि आदैचमुद्दिश्य वृद्धिसंज्ञा विहिता। वृद्धिः संज्ञा आदैच संज्ञी, अनयोः संज्ञासंज्ञिभावः अनेनैव प्रथमतया सूत्रेण विहितः। अन्येन केनापि सूत्रेण वृद्धिसंज्ञाविधानं कृतं स्याच्चेदस्मिन् सूत्रे वृद्धिशब्दः अर्थपरकः स्यात्। परन्तु तथा न कृतम्। वृद्धिपदस्य अर्थोऽत्र अविवक्षितः। तस्मादर्थपरत्वे शक्तिग्रहाभावात् वृद्धिपदं पदपरकमेव।

**संज्ञासूत्राणां विधित्वम्—**

इदानीमयं प्रश्नः समुदेति यत् संज्ञासूत्राणां विध्यर्थकत्वमुत नियमार्थकत्वम्। सर्वे शब्दाः सर्वेषामर्थानां वाचकाः इत्यर्थकेन 'सर्वे सर्वार्थवाचकाः' इति न्यायेन वृद्धिशब्दः सर्वेष्वर्थेषु वाचको भवति। तथा सर्वेषु आकारैकारौकाराणामपि अन्तर्भावाद् वृद्धिशब्दः एतेषामपि वाचको भवति। तेन अपूर्वार्थबोधकत्वाभावेन 'वृद्धिरादैच्' इति सूत्रस्य विधित्वं न सम्भवति परन्तु नियमार्थत्वमेव। कारणं हि अन्येषामर्थानां वृद्धिशब्दः वाचको मास्तु इति सूत्रस्यास्य नियमार्थत्वमेव। "व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्"[21] इत्यनेन भर्तृहरिमते संज्ञासूत्राणां नियमत्वव्यवहारः प्रदर्शितः। सङ्केतग्राहके संज्ञासूत्रे सङ्केतज्ञानरूपप्रकरणबलात् प्राकरणिकस्यैव ग्रहणं नान्यस्येति अप्राकरणिकस्य व्यावृत्तौ फलितं नियममादाय संज्ञासूत्रे नियमत्वव्यवहारः।

इति चेन्न सर्वशब्दानां सर्वार्थवाचकत्वेऽपि सङ्केतज्ञानाभावे अर्थबोधो नैव सम्भवति। अतः अर्थबोधाय सङ्केतज्ञानमावश्यम्। सङ्केतज्ञानमजानतः पुरुषस्य अर्थबोधो न स्यात्। अत्रापि एतस्मात् सूत्रात् पूर्वं वृद्धिपदस्य शक्तिः आदैच्पदे अस्तीति इदं ज्ञातं नासीत्। इदमेव सूत्रं तज्ज्ञापयति। तस्मादस्य अज्ञातशक्तिज्ञापकत्वेन विधित्वमेव। किञ्च 'सर्वे सर्वार्थवाचकाः' इति तु योगिदृष्ट्यैव न तु अस्मदादिदृष्ट्या। तस्मात् संज्ञासूत्राणाम् अज्ञातशक्तिज्ञापकत्वात् विधित्वमस्त्येव। वृद्धिशब्दस्य आदैजर्थे एव शक्तिग्राहकस्य शास्त्रस्य 'वृद्धिरादैच्' इति संज्ञासूत्रकरणे भगवतः पाणिनेरिच्छैव नियमिका। स्वेच्छयैव संज्ञा क्रियते। एवञ्च आसां संज्ञानां व्याकरणे व्युत्पादनाभावेऽपि शिष्टप्रयोगात्साधुत्वम्।

**सूत्रेणातद्भावितानामपि ग्रहणम्—**

तेन भाविताः तद्भाविताः। तेन वृद्धिशब्देन भाविताः विहिताः ये ते तद्भाविताः। न तद्भाविताः अतद्भाविताः। वृद्धिशब्देन यत्र आकारैकारौकाराः विधीयन्ते तेषामेव वृद्धिसंज्ञा भवतीति तद्भावितपक्षः। यथा 'रामः' इति। अत्र हि 'अत उपधायाः' (अष्टा.– ७.२.११६) इत्यनेन अकारस्य वृद्धौ आकारः। स्वयं सिद्धा ये आकारैकारौकाराः तेषामेव वृद्धिसंज्ञा इति अद्भावितपक्षः। यथा 'शाला', 'माला' इत्यादि। अनेन अतद्भावितानाम् आकारैकारौकारानामेव न केवलं वृद्धिसंज्ञा अपितु स्वयं सिद्धानामतद्भावितानामपि। तेन शलाशब्दघटकाद्याकारस्य स्वयंसिद्धस्यापि वृद्धिपदेन ग्रहणात् 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (अष्टा.– १.१.७३) इति सूत्रेण

वृद्धसंज्ञा सिद्धा। तत्फलन्तु 'वृद्धाच्छः' (अष्टा.– ४.२.११४) इत्यनेन छप्रत्ययः। तेन 'शालीयः' इति रूपं सिद्धम्। अनेन केवलं तद्भावितानामेव ग्रहणात् 'शाला' इत्यत्र आकारस्य वृद्धिसंज्ञाभावात् वृद्धसंज्ञा न स्यात्। तेन इदं सिद्धं भवति यत् वृद्धिशब्देन तद्भावितानामतद्भावितानां[22] चेति उभयविधानां ग्रहणं भवति।

**उपसंहृतिः—**

'वृद्धिरादैच् इति सूत्रार्थविमर्शः' इत्यभिधे लघुशोधप्रबन्धेऽस्मिन् विस्तरेण 'वृद्धिरादैच्' इति सूत्रार्थः विचारितः। दीक्षितमते सूत्रे 'आदैच्' इति समस्तं पदम्। प्रदीपकारः कैयटोऽपि तथैव। परन्तु नागेशमते 'आदैच्' इत्यसमस्तं पदम्। पदमञ्जरीकारोऽपि तथैव। महाभाष्यकारमते असमस्तपक्ष एव न्याय्यः इति मन्मतिः। किञ्च संज्ञासु उभयसंज्ञाप्रवृत्तिः भवति। तेन संज्ञयोः समावेशात् 'वृद्धिरादैच्' इत्यत्र पदत्वात् कुत्वाभावः, 'वृद्धिरादैजदेङ्गुणः' इति संहितायां भत्त्वात् जश्त्वं तु भवत्येव। वर्णसमाम्नाये पाठाभावात् सवर्णग्राहकत्वाभावादपि आदित्यत्र तपरकरणन्तु सन्देहनिवृत्त्यर्थं किञ्च ऐच्पदार्थम्। असन्देहार्थतया पूर्वार्थं, प्लुतवारणाय च परार्थं तपरोच्चारणमिति बोध्यम्। 'आत्' इत्यनेन षण्णामाकाराणाम् 'ऐच्' इत्यनेन वर्णद्वयस्य ग्रहणं भवति। किञ्च 'आत्' इत्यत्र जात्यभिप्रायेण 'ऐच्' इत्यत्र तिरोहितावयवाभिप्रायेण एकवचनम्। सूत्रे 'वृद्धिः' इति संज्ञादलम्, 'आदैच्' इति संज्ञिदलम्। किञ्च वृद्धिपदमत्र मङ्गलवाचकमपि सूत्रकृता प्रयुक्तम्। स च वृद्धिशब्दः सूत्रे स्वरूपपरः न तु अर्थपरः। सूत्रेऽस्मिन् वृद्धिशब्देन तद्भावितानामतद्भावितानां चेति उभयविधानां ग्रहणं भवति। एवमत्र 'वृद्धिरादैच्' इति सूत्रार्थः दिङ्मात्रमेव विमृष्टः विस्तरसस्तु व्याकरणनिष्णातैः सुधिभिः एव कर्तव्यः इति शम्।

## Endnotes

1. महाभाष्ये पस्पशाह्निके शास्त्रप्रयोजनाधिकरणम्। (पृ.- २६)
2. "आच्च, ऐच्च् इति आदैजिति समाहारे द्वन्दोऽयमिति मत्वा वृद्धिः, आदैच् इति द्विपदम्। इतरेतरयोगे हि बहुत्वाद्बहुवचनं स्यात्। ननु च समाहारेऽपि 'द्वन्द्वाच्चुदषहान्तात्' इति टच् समासान्तः स्यात्; समासान्तविधेरनित्यत्वान्न भविष्यति" इति 'वृद्धिरादैच्' इति सूत्रे न्यासकारः जिनेन्द्रबुद्धिः। (पृ.– ५३)
3. "प्रतेरंश्वादयस्तत्पुरुषे इत्यन्तोदात्तत्वायांश्वादिषु राजञ्शब्दपाठोऽस्या ज्ञापकः। अन्यथा टचैवान्तोदात्तत्वे सिद्धे किं तेन" इति परिभाषेन्दुशेखरे 'समासान्तविधिरनित्यः' इति परिभाषायां नागेशः। (पृ.– ३४९)
4. "आदैच् शब्दस्य द्वन्द्वत्वात् 'अनयोः' इति द्विवचननिर्देशः" इति भाष्यप्रदीपे कैय्यटः। (पृ.– १६१)
5. "आच्च ऐच्चेतीतरेतरयोगद्वन्द्वो वा। तथा सति सौत्रमेकवचनम्" इति 'वृद्धिरादैच्' इति सूत्रे बालमनोरमा। (पृ.– ३२)
6. "आच्च ऐच्चेति इतरेतरयोगद्वन्द्वः, सुपां सुलुगिति औङः सुर्लुग्वा" इति 'वृद्धिरादैच्' इति सूत्रे तत्त्वबोधिनी। (पृ.– २९)

7. "पदत्रयं, पस्पशायां भाष्ये 'वृद्धिः आद् ऐच्' इति पक्षविभागदर्शनात्। वृद्धिशब्दस्त्वावृत्त्या योज्यः अत्र पक्षे 'अनयोः' इति भाष्यं खण्डयोरित्यर्थकम्" इति प्रदीपोद्योते नागेशः। (पृ.– १५१)
8. महाभाष्ये पस्पशाह्निके व्याकरणाधिकरणम्। (पृ.– ७६)
9. "त्रिपदमिदं सूत्रम्– वृद्धिः, आद्, ऐज्" इति 'वृद्धिरादैच्' इति सूत्रे पदमञ्जरीकारः हरदत्तः। (पृ.– ५३)
10. "वृद्धिः, आत्, ऐजिति पदत्रयमिति– न समासान्तादिप्रवृत्तिशङ्का" इति लघुशब्देन्दुशेखरे नागेशः। (पृ.– १३६)
11. "अनित्यत्वस्यागतिकगतित्वान्नेदं युक्तम्" इति सिद्धान्तकौमुद्याः लक्ष्मीटीका। (पृ.– ५८)
12. महाभाष्ये 'वृद्धिरादैच्' इति सूत्रे संज्ञासूत्रत्वसाधनाधिकरम्। (पृ.– १६१)
13. "अनयोः इत्यस्य पदयोरिति विशेष्यम्। पदानामेव साधुत्वान्वाख्यानादिति भावः" इति प्रदीपोद्योते नागेशः। (पृ.– १६१)
14. पाणिनीयशिक्षा– ४२।
15. महाभाष्ये पस्पशाह्निके शास्त्रप्रयोजनाधिकरणम्। (पृ.– २३)
16. "एषा ह्याचार्यस्य शैली लक्ष्यते– यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति– अचोऽक्षु हलो हल्षु" इति महाभाष्ये प्रत्याहाराह्निके प्रत्याहारष्विद्ग्रहणाभावाधिकरणम्। (पृ.– १३७)
17. "तपरकरणमसन्देहार्थतया पूर्वाथम्। प्रकृतसूत्रे भाष्येऽत्र गुणानामभेदकत्वं ज्ञापकादाश्रित्य सवर्णग्रहणार्थत्वाभावस्योक्तत्वात्" इति 'वृद्धिरादैच्' इति सूत्रे नागेशः। (पृ.– १३६)
18. महाभाष्ये 'वृद्धिरादैच्' इति सूत्रे संज्ञासूत्रत्वसाधनाधिकरणम्। (पृ.– १६४)
19. महाभाष्ये 'वृद्धिरादैच्' इति सूत्रे संज्ञासूत्रत्वसाधनाधिकरणम्। (पृ.– १६४-१६५)
20. "विधेयत्वेऽपि तस्य पूर्वपाठो मङ्गलार्थः। 'अपृक्त एकाल्' इत्यादौ तथा करणं विधेयस्य प्रथमं प्रयोगेऽसाधुत्वभ्रमनिवारणायेति भाष्ये स्पष्टम्" इति 'वृद्धिरादैच्' इति सूत्रे लघुशब्देन्दुशेखरे नागेशः। (पृ.– १३८)
21. वाक्यपदीयम्– २.३६४
22. "वृद्धिशब्दः संज्ञात्वेन विधीयते, प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च" इति 'वृद्धिरादैच्' इति सूत्रे काशिकाकारः। (पृ.– ५६)

## Bibliography


- Bhartṛhari. *Vākyapadīya*. Ed. Sharma, Raghunath. Varanasi: Sampurnanand Sanskrit University, 1980. Sanskrit.
- Bhartṛhari. *Vākyapadīya*. Ed. Tiwari, Harinarayan. Varanasi: Chowkhamba Sanskrit Series Office, 2015. 1st Edition. Sanskrit & Hindi.
- Bhaṭṭojidīkṣitaḥ. *Vaiyākaraṇasiddhāntakaumudī*. Ed. Sharma, Giridhar. Delhi: Motilal Banarsidass, 1966. Sanskrit.
- Nāgeśabhaṭṭaḥ. *Laghuśabdenduśekharaḥ*. Ed. Shastri, Bala. Varanasi: Chaukhamba Surbharati Prakashan, 2013. Sanskrit.
- Nāgeśabhaṭṭaḥ. *Paribhāṣenduśekharaḥ*. Ed. Mishra, Vishwanath. Vara-

nasi: Chaukhamba Surbharati Prakashan, 2011. Sanskrit & Hindi.

- Pāṇiniḥ. *Aṣṭādhyāyī*. Ed. Pandey, Gopal Dutt. Varanasi: Chaukhamba Surbharati Prakashan, 2009. Sanskrit.
- *Pāṇinīyaśikṣā*. Ed. Ghosh, Manomohan. Kolkata: University of Calcutta, 1938. Sanskrit & English.
- Patañjali. *Vyākaraṇamahābhāṣya*. Ed. Jaishankar Lal Tripathi. Varanasi: Chowkhamba Krishnadas Academy, 2017. Sanskrit & Hindi.
- Patañjaliḥ. *Vyākaraṇamahābhāṣyam*. Ed. Sastri, Bhargava. Delhi: Chaukhamba Sanskrit Pratisthan, 1987. Reprint Edition. Sanskrit.
- Vāmanajayādityau: *Kāśikā*. Ed. Tripathi, Dr. Jaya Shankar Lal & Malaviya, Dr. Sudhakar. Varanasi: Tara Printing Works. 1985. Sanskrit & Hindi.